19E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : डिसेंबर – २०२३**

**सत्र ६ वे**

**विषयः कादम्बरी (19E462)**

**दिनांक : १५/१२/२०२३** **गुण :८०** **वेळ : स. १०.०० ते १.००**

सूचना : सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणामनुवादं ससंदर्भं लिखत।** **(२८)**

१) देव, विदितसकलशास्त्रार्थः, राजनीतिप्रयोगकुशलः, पुराणेतिहासकथालापनिपुणः, वेदिता गीतश्रुतीनां, काव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं च कर्ता, परिहासालापपेशलः, वीणावेणुमुरजादीनामसमः श्रोता, नृत्तप्रयोगदर्शननिपुणः, चित्रकर्मणि प्रवीणः, द्यूतव्यापारे प्रगल्भः, प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरः, गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः, सकलभूतलरत्नभूतोऽयं वैशंपायनो नाम शुकः, सर्वरत्नानामुदधिरिव देवो भाजनमितिकृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता।

२) अथ विसर्जितराजलोको विश्राम्यताम् इति स्वयमेवाभिधाय तां चाण्डालकन्यकाम्, वैशम्पायनः प्रवेश्यतामभ्यन्तरम् इति ताम्बूलकरण्डकवाहिनीमादिश्य, कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरमा–विशत्। अपनीताभरणश्च दिवसकर इव विगलितकिरणजालः, चन्द्रतारकासमूहशून्य इव गगनाभोगः, समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्। तस्यां च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः, श्रमवशादुन्मिषन्तीभिः स्वेदजलकणिकासंततिभिरलंक्रियमाणमूर्तिः स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्।

३) अथ प्रतीहारी नरपतिकथनानन्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत्। प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमशनिभयपुञ्जितकुलशैलमध्यगतमिव कनकशिखरिणम् अनेकरत्नाभरणाकिरणजालकान्तारितावयवमिन्द्रायुधसहस्रसंछदिताष्टदिग्भागमिव जलधरदिवसम् उन्मयूखकान्तिविजयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादम्, अमलमणिकुट्टिमसंक्रान्तदेहप्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोह्यमानं राजानमद्राक्षीत्।

४) नमामि भर्त्सोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्चनम्।
समस्तसामन्तकिरीटवेदिकाविटङ्कपीठोल्लुठितारुणाङ्गुलि।।
अकारणाविष्कृतवैरदारुणादसज्जनात्कस्य भयं न जायते।
विषं महाहेरिव यस्य दुर्वचः सुदुःसहं संनिहितं सदा मुखे।।

५) राजा तु तामार्यां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनम्, अतिमहार्घहेमासनोपविष्टम्, अमरगुरुमिवाशेष–नीतिशास्त्रपारगम्, अतिवयसम्, अग्रजन्मानम्, अखिलमन्त्रिमण्डलप्रधानमात्यं कुमारपालितनामानमब्रवीत् श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता! प्रथमं तावदिदमेव महदाश्चर्यं यदयमसंकीर्णवर्णप्रविभागाभिव्यक्तमात्रानुस्वारसंस्कारयोगां विशेषसंयुक्तां गिरमुदीरयति। तत्र पुनरपरमभिमत–विषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः।

**प्र.२. ससंदर्भं स्पष्टीकुरुत। (केवलं पञ्च)** **(३०)**

१) हरिर्महारत्नमिवातिनिर्मलम्।
२) निबन्धेयमतिद्वयी कथा।
३) आलेख्यतामिव दर्शनमात्रफलाम्।
४) वैशम्पायनस्य आर्या
५) विहङ्गवेषधारी कश्चिच्छन्नं निवसति।
६) यदि कौतूहलम् आकर्षताम्।
७) विमानीकृतराजमण्डलः।

**प्र.३. टिप्पणीद्वयं लिखत।** **(२२)**

१) कुमारपालितस्याक्षेपः
२) बाणस्य रचनाचातुरी
३) कादम्बर्याः मङ्गलाचरणम् पूर्वजवर्णनं च

---------